शृङ्गेरी-द्वारका-पुरी-ज्योतिष्पीठाचार्य-स्वीकृता शासन समता विश्वप्रिया पाक्षिक

शारदा

संपादकः पं. वसन्त अ. गाडगीळ.

वार्षिकं मूल्यम् रू. २५ * अस्य अङ्कस्य रू. १-२५

स्मर्यताम् । श्रूयताम् ।। स्मर्यताम्

आ का श वा णी

डॉयशे वेले कलोन (पश्चिम जर्मनी)

प्रतिमासं द्वितीये सोमवासरे रात्रौ ९.२५ तः ९.३७

लघुलहरी ११७६५, ११७९५, १५३२०, १७८७५

विषयः जर्मनीदेशे विश्वे च सर्वत्र संस्कृत-वार्ताः

संस्कृत-कार्यक्रम-संचालिका - डॉ. याज्ञसेनी पोपट

'शारदा-दैनिक-वितरण-केन्द्रम्

राजा दीक्षित वृत्तपत्रागारम्

चिपळूण (रत्नागिरी) ४१५६०५

पुणे-डेरवण (चिपळूण)

यज्ञ-महोत्सव-विशेषाङ्क-दैनिकम् ४

वर्षम् २६ अङ्क ६

भारतीय-सौर-दिनाङ्कः ६ पौष १९०६

विक्रम-संवत् २०४१ शुक्रवासरः २८ डिसेंबर १९८४

।। यागानुष्ठान-महोत्सव साफल्ये निमित्तं करुणा पारमेश्वरी ।।

डेरवण (चिपळूण - महाराष्ट्र) दि. २८ डिसेम्बर १९८४

"रामायणं महाभारतं च न केवलं बृहद्-विस्तरम् आदि-काव्यम् महाकाव्यं वा । परं वेदाभ्यासकैः वेद-शास्त्र-संपन्नैः यथा वेद-पारायणं शास्त्र-ग्रन्थ-पाठः वा क्रियते तथैव श्रीरामायणस्य अपि पारायणं सश्रद्धं कर्तव्यम् । रामादिवत् वर्तितव्यं न तु रावणादिवत् इति शिक्षा दीक्षा च सर्वत्र प्रसारणीया । यतः रामायणम् इतिहासः प्राचीन-भारतस्य । दीपस्तम्भः सनातन-वैदिक-आर्य-धर्मावलम्बिनां कृते ।" इति बोधपाठः बहुभिः श्रीशिव-समर्थ-मन्दिरे प्रवर्तिते श्रीयज्ञानुष्ठान-महोत्सवे श्रीवाल्मीकि- रामायणस्य पारायण-पञ्चकं सुन्दर-काण्ड-हवनं साक्षात्कृत्य समधिगतः ।

श्रीयज्ञनारायण-मन्दिरे पश्चिमे विभागे ऋक्-संहिता-स्वाहाकारे प्रचलिते पूर्वभागे दशसु स्थण्डिलेषु प्रवर्तते अतिरुद्रानुष्ठानं शत-द्वय-रुद्र-पाठकैः सुस्वर-मन्तर-पाठेन संचालितम् । एतस्मिन् एव काले दक्षिण-भागे एकस्मिन् स्थण्डिले रामायण-पारायण-प्रधानेन-अभिनव-बाणभट्टत्वेन सर्व-विश्रुतेन पण्डितवरेण डॉ. आठलेकर श्रीपादरायभट्टेन प्रारब्धं सुन्दर-काण्ड-हवनं श्रीपाठकशास्त्रि-सहकारेण ।

अद्य शुक्रवासरे अतिरुद्रयाग-जपानुष्ठानं परिसमाप्य प्रारप्सयते अयुतचंण्डी-यागः ।

दश-ग्रन्थ-विशारदैः ऋक् संहिता स्वाहाकारः लक्ष-गणेश-यागः, अतिरुद्रस्वाहाकारः अयुतचण्डी-यागः, भागवत-पारायण-यागः, रामायण-पारायण यागः एतादृशेषु यागानुष्ठानेषु एकैकम् अपि साधयितुम् अतिदुष्करं बहु-परिश्रम-प्रचुर-व्यय-मानुषबल-साध्यम् इति सर्वैः सर्वत्र अनुभूयमाने, डेरवण-सदृशे दूरवर्तिनि ग्रामे एतानि सर्वाणि बृहद्विस्तराणि यागानुष्ठानानि सहस्राधिक ब्रम्हवृन्दं भारतस्य विविधेभ्यः दिग्-विभागेभ्यः समानीय समकालम् एव परम पावित्र्येण समर्थतया संचाल्यन्ते इति निरीक्ष्य चकितचकिताः साक्षात्क्रियन्ते निरीक्षकाः ।

सर्वेषां ब्राम्हणानां यागानुष्ठान-कर्मणि विविधेषु कार्येषु नियोजितानां निवास-प्रसाद-प्रवास-पारिश्रमिक प्रदानादि-प्रबन्धः अपि अनितर-साधारणः, केनचन सम्राट्पद सुभूषितेन कृत इव साक्षात्कृत्य कथम् इदं सर्वं प्रवर्तते इति पृष्टे पू. दिगम्बरदासमहाराजैः सहजतया सस्मितं विनिवेदितम् "इयं करुणा पारमेश्वरी" इति ।



योऽन्तः प्रविश्य मम वाचमिमां प्रसुप्ताम् ।
संजीवयत्यखिल-शक्ति-धरः स्व-धाम्ना ।।
अन्यांश्च हस्त-चरण-श्रवण-त्वगादीन् ।
प्राणान् नमो भगवते पुरुषाय तुभ्यम् ।।

।। श्रीराम जय राम जय जय राम ।।

स्मर्यताम् श्रूयताम् स्मर्यताम्

प्रतिदिनं प्रातः ७.०० सायं ६.१०

संस्कृत-वार्ताः श्रूयन्ताम् । प्रवाचिका - विजयश्री - प्रमुखाः आकाशवाणीं-संस्कृत-वार्ता-विभाग-सेवकाः दिवानिशं प्रयत्नशीलाः संस्कृत-प्रसारणस्तर-वर्धनाय साक्षात्कृताः 'शारदा'-कारैः स्वयं राजधानीं दिल्लीं गत्वा । भारतवर्षे सर्वत्र संस्कृत-श्रोतृ-संघस्य (क्लब) स्थापनेन प्रोत्साहनी-यास्ते प्रयासाः सर्वैः । स्वामिप्रायः प्रेष्यतां शारदायै । संपादकः

शृङ्गेरी-द्वारका-ज्योतिष्पीठाचार्य-स्वीकृता शासन-पुरकृता विश्वप्रिया

शारदा

संपादकः वसन्त अ. गाडगीळ

वर्षम् २६ अङ्क ६ सौर १७ पौष १९०६ २८ डिसेम्बर १९८४

वार्षिकं मूल्यम् रू. २५ * अस्य अङ्कस्य रू. १-२५

अगतिकाः स्मः । क्षन्तव्याः वयम् । कर्गज-मुद्रणसाहिती-मूल्यवर्धनात् नूतने षड्विंशति-(२६)-तमे (१ नोव्हेम्बर १९८४) शारदीये वर्षे

शा र दा - मू ल्य - व र्ध न म् ।

मूल्यम्	भारतवर्षे रूप्यकाणि	विदेशेषु अमेरिकन डॉलर
वार्षिकम्	२५	१०
पञ्चवार्षिकम्	१२१	५०
यावज्जीवम्	५०१	२००

प्राणार्पणेन रामस्य जन्म-स्थल-विमोचनम् ।

कल्याणानां निधानं कलि-मल-मथनं पावनं पावनानाम् ।
पाथेयं यन् मुमुक्षोः सपदि पर-पद-प्राप्तये प्रस्थितस्य ।।
विश्राम-स्थानमेकं कवि-वर-वचसां जीवनं सज्जनानाम् ।
बीजं धर्मद्रुमस्य प्रभवतु भवतां भूतये रा म ना म ।।

मुमुक्षूणां पाथेयत्वेन परम-कल्याण-कारकं परमपवित्रं 'रामनाम' इति हनूमन्नाटक-मङ्गलम् । परं भारत-वर्षस्य दुर्भाग्य-चक्र-ग्रस्तम् इदं श्रीरामनाम ।

अयोध्या-नगरी प्रभुश्रीरामचन्द्रस्य जन्मभूमिः । महाराजधानी श्रीरामराज्यस्य । उत्तर-प्रदेश-यात्रावसरे 'यात्रि-जन मार्गदर्शकाः यात्रिजनान् नयन्ति गोरा-राम-मन्दिरं, काळाराम-मन्दिरं च । परं "शरयू-तीरे कुत्र सा राम-जन्म-स्थली ?" इति प्रश्ने पृष्टे यात्रि-जनान् वञ्चयन्ति, - "तत्र किमपि दर्शनीयं नास्ति । यात्रा-स्थलं 'काळाराम / गोरारामन्दिरम् एव ।" इति अस्माभिः स्वयम् अनुभूतम् । परं श्रुतम् आसीत् श्रीराम-जन्म-स्थली कारागृह-बद्धा इति । अतः सकुतूहलं वयं प्राप्ताः तां परम्-पवित्रां श्रीराम-जन्म-स्थलीं यत्र शासकीयाः आरक्षकाः श्रीराम-भक्तानां हिन्दूनां तत्र प्रवेशः मा भवतु इति सशस्त्रं स्थापिताः साक्षात्कृताः । अन्तर्भागे तस्य स्थलस्य श्रीराम प्रतिमा पुष्प-मण्डिता आसनस्था निरीक्षिता । कश्चन पूजकः प्रतिदिनं प्रातः समागत्य तत्र पूजयति इत्यपि श्रुतम् । बहिः 'श्रीराम जय राम जय जय राम ।' इति श्रीराम नाम-जप-पराः अखण्डं जपानुष्ठानं कुर्वाणाः साक्षात्कृताः । अहर्निशम् इदं श्रीराम-नाम-संकीर्तनं तत्र प्रवर्तते ।

नैकेभ्यः संवत्सरेभ्यः न्यायालयाधीनः हिन्दु मुसलमान संघर्षः श्रीराम-जन्म-भूमि-स्वामित्व-विषये इति ज्ञातम् । मोगल सम्राट् बाबर कालाद् आरभ्य यवनैः बलाद आक्रम्य स्वाधीनीकृता श्रीरामजन्मभूः हिन्दु-धर्मीयैः शतशः प्राणार्पणेन जिता पुनरपि यवन साम्राज्य प्राबल्येन परहस्त गतं गता ।

स्वतन्तर-भारते यदा सौराष्ट्रे श्रीसोमनाथस्य प्राणप्रतिष्ठा सरदार वल्लभभाई पटेल संदृशस्य गृहमन्तितरणः संकल्पेन श्री. कन्हैयालाल मुनशी प्रयासेन सत्फलतां गता तदा अस्माकम् अहोभाग्यं तत् स्वर्णिम् क्षणं स्वयं तत्र समुपस्थाय साक्षात्कर्तुम् । परं तदा प्रभृति अस्वस्थाः स्मः वयं यत् छत्रपति श्रीशिवरायस्य संकल्पः काशीस्थं श्रीविश्वनाथं, मथुरागतं भगवतः श्रीकृष्णस्य जन्मस्थलं शरयू-तीरे श्रीरामचन्द्र जनु-स्थलीं मोचयितुम् अद्यावधि नैव परिपूर्यते इति ।

भारतीयैः सर्वैः त्यक्त-निद्रैः प्राणार्पणेन इयं त्रयी सत्वरातिसत्वरं मोचनीयां । इदं आद्यं धर्म कार्यम्, राष्ट्रकार्यम् । अन्यथा श्रीरामनामोच्चारणे अनधिकारः सिद्धस्यात् सर्वेषाम् अस्माकम् ।

।। श्रीराम जय राम जय जय राम ।।

।।प्राणार्पण करा आणि सोडवा राम-जन्म-भू।।

कल्याणकारक गोष्टींचा जणु सागर, कलियुगातील पापांचे निर्दालन, पवित्रातील पवित्र मोक्षमार्गी जनांची श्रेष्ठपदप्राप्तीच्या प्रवासातील शिदोरी (वाल्मीकीसारख्या) श्रेष्ठ कवींच्या वाणीचे 'विसाव्याचे' ठिकाण, सज्जनाचे जीवन, धर्मवृक्षांचे मुलस्थान असणारे 'श्रीरामनाम' तुमचे सर्वांचे कल्याण करो.

मोक्षमार्गाची वाटचाल करणाऱ्यांची शिदोरीच असे परमकल्याणकारक, अतिशय पवित्र असे श्रीरामनाम असल्याचा निर्वाळा हनूमन्-नाटककार आपल्या नाटकाचे मंगलात देतो. परंतु भारताच्या दुर्भाग्याच्या फेऱ्यात आज तेच श्रीरामनाम सापडलेले दिसते.

अयोध्या-नगरी प्रभु श्रीरामचंद्रांची जन्मभूमि आणि रामराज्याची महाराजधानी. उत्तरप्रदेशाची यात्रा करीत असताना 'गाईड' म्हणून यात्रा-स्थळे दाखविणारे गोरा राम, काळा राम दाखवितात, पण शरयूतीरावरील ती रामजन्माची जागा कुठे? असे विचारलेत तर मात्र 'काळाराम' 'गोराराम' हीच यात्रेची ठिकाणे. 'तिकडे काही नाही पहाण्यासारखे रामजन्माच्या ठिकाणी' असे सांगून आपली चक्र फसवणूक करतात असा अनुभव खुद्द आम्हालाच आला. परंतु आम्ही रामजन्म स्थळ तुरुंगाच्या गजाआड बंदिस्त आहे, असे ऐकले होते. म्हणून मोठ्या औत्सुक्याने आम्ही हिंदूंना प्रवेश बंद असणाऱ्या आणि सशस्त्र पोलीसांचा कडक पहाराअसणाऱ्या रामजन्मस्थळी जाऊन पोचलो.

त्या रामजन्मभूमीच्या आतल्या भागात एका आसनावर फुले घालून ठेवलेली रामाची एक फ्रेम दिसली. कोणीतरी (सरकारी) पुजारी रोज सकाळी येऊन पूजा करतो असेहि ऐकले. बाहेरच्या बाजूला 'श्रीराम जय राम जय जय राम' असे रात्रंदिवस भजन करीत बसलेले भक्त आढळले.

अनेक वर्षापासून या रामजन्मभूमिच्या मालकीचा वाद कोर्टाच्या टेबलावर आहे असे समजले. मोगल बादशहा बाबरच्या काळापासून मुसलमानानी दंडेलीने बळकावलेली ही रामजन्मभूमी शेकडो हिंदूनी प्राणांचे 'बलिदान करून परत मिळविली. परंतु पुन्हा मुसलमानांनी जोर केला आणि त्यांच्या हाती गेली ती गेलीच.

स्वातंत्र्य मिळाल्यानंतर सरदार वल्लभभाई पटेल यांच्यासारख्या गृहमंत्र्यांमुळे 'त्यांच्या संकल्पाने' श्रीकन्हैयालाल मुनशी यांच्या प्रयासामुळे सौराष्ट्रातील सोमनाथाची प्राणप्रतिष्ठा राष्ट्राध्यक्ष डॉ. राजेंद्रप्रसाद यांच्या हातानी पार पडली. तो सोन्याचा क्षण स्वतः त्या मंदिरात त्याचवेळी पहाण्याचे थोर भाग्य आम्हाला लाभले(१ मे १९५१). पण तेव्हापासून काशीच्या श्रीविश्वनाथाला, मथुरेतील श्रीकृष्णाच्या आणि अयोध्या नगरीतील श्रीरामचंद्राच्या जन्मस्थानाना (मुसलमानांपासून) मुक्त करण्याचा छत्रपती श्रीशिवाजीमहाराजांचा संकल्प अजून अपूराच राहिला म्हणून खंत वाटते.

सर्व भारतीयानी आता ही झोपण्याची वेळ नाही हे जाणून प्राणाची बाजी लावून ही पवित्र रामजन्मभूमी कारामुक्त केली पाहिजे. हे सर्वप्रथम करावयाचे धर्मकार्य आहे. राष्ट्र कार्य आहे. नाहीतर आम्ही श्रीरामचंद्राचे नाव घ्यायला नालायक ठरू.

।। श्रीराम जय राम जय जय राम ।।

॥ श्रीः ॥



श्रीरामरक्षास्तोत्रम्

श्री गणेशाय नमः ।
अस्य श्रीरामरक्षास्तोत्रमन्त्रस्य
बुधकौशिक ऋषिः ।
श्रीसीतारामचन्द्रो देवता ।
अनुष्टुप् छन्दः । सीता शक्तिः ।
श्रीमान् हनुमान् कीलकं
श्रीरामचन्द्रप्रीत्यर्थे रामरक्षास्तोत्रजपे विनियोगः ।
अथ ध्यानम्
ध्यायेदाजानुबाहुं धृतशरधनुषं
बद्धपद्मासनस्थं
पीतवासो वसानं
नवकमलदलस्पर्धिनेत्रं प्रसन्नम् ।
वामाङ्कारूढसीतामुखकमलमिलल्लोचनं
नीरदाभं
नानालङ्कारदीप्तं
दधतमुरुजटामण्डलं रामचन्द्रम् ॥

इति ध्यानम्

चरितं रघुनाथस्य शतकोटिप्रविस्तरम् ।
एकैकमक्षरं पुंसां महापातकनाशनम् ॥ १॥
ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामुकुटमण्डितम् ॥ २ ॥
सासित्राणधनुर्बाणपाणिं नक्तंचरान्तकम् ।
स्वलीलया जगत्त्रातुमाविर्भूतमजं विभुम् ॥ ३ ॥
रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम् ।
शिरो मे राघवः पातु भालं दशरथात्मजः ॥ ४ ॥
कौशल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती ।
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ॥ ५ ॥
जिह्वां विद्यानिधिः पातु कण्ठं भरतवन्दितः ।
स्कन्धौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः ॥ ६ ॥
करौ सीतापतिः पातु हृदयं जामदग्न्यजित् ।
मध्यं पातु खरध्वंसी नाभिं जाम्बवदाश्रयः ॥ ७ ॥
सुग्रीवेशः कटी पातु सक्थिनी हनुमत्प्रभुः ।
ऊरू रघूत्तमः पातु रक्षःकुलविनाशकृत् ॥ ८ ॥
जानुनी सेतुकृत्पातु जंघे दशमुखान्तकः ।
पदौ विभीषणश्रीदः पातु रामोऽखिलं वपुः ॥ ९ ॥
एतां रामबलोपेतां रक्षां यः सुकृती पठेत् ।
स चिरायुः सुखी पुत्री विजयी विनयी भवेत् ॥ १० ॥
पातालभूतलव्योमचारिणश्छद्मचारिणः ।
न द्रष्टुमपि शक्तास्ते रक्षितं रामनामभिः ॥ ११ ॥
रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ॥ १२ ॥
जगज्जैत्रैकमन्त्रेण रामनाम्नाभिरक्षितम् ।
यः कण्ठे धारयेत्तस्य करस्थाः सर्वसिद्धयः ॥ १३ ॥
वज्रपञ्जरनामेदं यो रामकवचं स्मरेत् ।
अव्याहताज्ञः सर्वत्र लभते जयमङ्गलम् ॥ १४ ॥
आदिष्टवान्यथा स्वप्ने रामरक्षामिमां हरः ।
तथा लिखितवान्प्रातः प्रबुद्धो बुधकौशिकः ॥ १५ ॥
आरामः कल्पवृक्षाणां विरामः सकलापदाम् ।
अभिरामस्त्रिलोकानां रामः श्रीमान्स नः प्रभुः ॥ १६ ॥
तरुणौ रूपसम्पन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १७ ॥
फलमूलाशिनौ दान्तौ तापसौ ब्रह्मचारिणौ ।
पुत्रौ दशरथस्यैतौ भ्रातरौ रामलक्ष्मणौ ॥ १८ ॥
शरण्यौ सर्वसत्त्वानां श्रेष्ठौ सर्वधनुष्मताम् ।
रक्षःकुलनिहन्तारौ त्रायेतां नो रघूत्तमौ ॥ १९ ॥
आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषङ्गसङ्गिनौ ।
रक्षणाय मम रामलक्ष्मणावग्रतः पथि सदैव गच्छताम् ॥ २० ॥
सन्नद्धः कवची खड्गी चापबाणधरो युवा ।
गच्छन्मनोरथोऽस्माकं रामः पातु सलक्ष्मणः ॥ २१ ॥
रामो दाशरथिः शूरो लक्ष्मणानुचरो बली ।
काकुत्स्थः पुरुषः पूर्णः कौशल्येयो रघूत्तमः ॥ २२ ॥
वेदान्तवेद्यो यज्ञेशः पुराणपुरुषोत्तमः ।
जानकीवल्लभः श्रीमानप्रमेयपराक्रमः ॥ २३ ॥
इत्येतानि जपेन्नित्यं मद्भक्तः श्रद्धयान्वितः ।
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः ॥ २४ ॥
रामं दूर्वादलश्यामं पद्माक्षं पीतवाससम् ।
स्तुवन्ति नामभिर्दिव्यैर्न ते संसारिणो नराः ॥ २५ ॥
रामं लक्ष्मणपूर्वजं रघुवरं सीतापतिं सुन्दरं
काकुत्स्थं करुणार्णवं गुणनिधिं विप्रप्रियं धार्मिकम् ।
राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥ २६ ॥
रामाय रामभद्राय रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय सीतायाः पतये नमः ॥ २७ ॥
श्रीराम राम रघुनन्दन राम
श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम रणकर्कश राम राम
श्रीराम राम शरणं भव राम राम ॥ २८ ॥
श्रीरामचन्द्रचरणौ मनसा स्मरामि
श्रीरामचन्द्रचरणौ वचसा गृणामि ।
श्रीरामचन्द्रचरणौ शिरसा नमामि
श्रीरामचन्द्रचरणौ शरणं प्रपद्ये ॥ २९ ॥
माता रामो मत्पिता रामचन्द्रः
स्वामी रामो मत्सखा रामचन्द्रः ।
सर्वस्वं मे रामचन्द्रो दयालु-
र्नान्यं जाने नैव जाने न जाने ॥ ३० ॥
दक्षिणे लक्ष्मणो यस्य वामे च जनकात्मजा ।
पुरतो मारुतिर्यस्य तं वन्दे रघुनन्दनम् ॥ ३१ ॥
लोकाभिरामं रणरङ्गधीरं
राजीवनेत्रं रघुवंशनाथम् ।
कारुण्यरूपं करुणाकरं तं
श्रीरामचन्द्रं शरणं प्रपद्ये ॥ ३२ ॥
मनोजवं मारुततुल्यवेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानरयूथमुख्यं
श्रीरामदूतं शरणं प्रपद्ये ॥ ३३ ॥
कूजन्तं रामरामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥ ३४ ॥
आपदामपहर्तारं दातारं सर्वसम्पदाम् ।
लोकाभिरामं श्रीरामं भूयो भूयो नमाम्यहम् ॥ ३५ ॥
भर्जनं भवबीजानामर्जनं सुखसम्पदाम् ।
तर्जनं यमदूतानां रामरामेति गर्जनम् ॥ ३६ ॥
रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥ ३७ ॥
राम रामेति रामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ ३८ ॥

इति श्रीबुधकौशिकमुनिविरचितं श्रीरामरक्षास्तोत्रं संपूर्णम् ।

शारदा : २६ : ६ पत्रजीकृत क्रमाङ्कः पीएनसीडब्ल्यू ५० पूर्वमूल्यं विना प्रेषा अनुज्ञा क्र. ७१ पुणे ३० पृथक्करणकार्यालये समर्पितम्

श्री ज्ञानेश्वमहाराजानाम् आर्तिक्यम्

जय देव जय देव जय जय ज्ञानेश ।
सद्गुरुकरुणासिन्धो जय जय विश्वेश । । धु । ।
ज्ञानेश्वरनामायं लक्ष्मीपतिमूर्तिः ।
ज्ञानेश्वर्या व्यकरोत् श्रीगीता विकृतिः ।
ज्ञानवरिष्ठास्तं ते ज्ञानराज व्यवदन् ।
भक्त जनास्ते सर्वे माऊलि समकथयन् । । १ । ।
आधारः खलु मूर्तो भगवद्धर्माणाम् ।
श्रीनाथाभिधसद्धिः पोषित तत्त्वानाम् ।
तुकया नामा साधुः स्थापितवान् कलशम्
प्रयतन्ते पुष्टयर्थं भक्तजना अनिशम् । । २ । ।
सोढा ज्ञानजनानां मर्मच्छिद्वृत्तिः ।
चंन्द्र-ज्योत्स्नेवासौ न हि नष्टा शान्तिः ।
महिषमुखात् प्राकट्यं ते वेदा नीताः ।
परमं विस्मयमापुश्चरणे नतवन्तः । । ३ । ।

व्याघ्रारूढं दृष्टवा तं गर्वित-चांगम् ।
आरुह्यासौ भित्तिं तमगच्छत् स्वांगम् ।
प्रादर्शि श्रीशस्य व्यापिनी सत्ता ।
सर्वत्रैवास्ति समा पश्यत रे मत्ताः । । ४ । ।
नम्रत्वेन स्पृष्टवा चांगस्त्वच्चरणम् ।
विनतायास्मै कथितं भवतात् प्रभुशरणम् ।
ज्ञानादिक विभवैस्तैर्नैव ज्ञातुमलम् ।
सोऽहंभावैस्तज्ज्ञैः शक्यं तद्विमलम् । । ५ । ।
सज्जनयोगिवराणां सोऽयं मुगुटमणिः ।
भूत्वा व्यकरोद्धन्यां तां भारतजननीम् ।
तृप्ताः खलु सन्तस्ते त्वद् बोधामृत पानम् ।
विद्वज्जन-मुग्धास्ते ह्यभवन् गुणगानात् । । ६ । ।
अमृतानुभवं ग्रंथं दृष्टवा गुरुवर्याः ।
निवृत्तिनाथाः प्रीतास्ते पावनचर्याः ।
लब्ध्वा विश्वाकारं रूपं शान्ति युतम् ।
आळंदी-क्षेत्रेऽस्मिन् पश्यत नुत-विश्वम् । । ७ । ।
चरमचरं तव रूपं विद्वज्ज्ञातचरम् ।
अज्ञजना नो शक्ता ज्ञातुं सूक्ष्मतरम् ।
दिव्यगुणालं करणं दृष्टवा विनययुतम् ।
त्वत्-पद-कमले विनतं पालय मां सततम् । । ८ । ।

श्री विश्वनाथशास्त्री दण्डगे
महादेव गल्ली, बेळगाव

* *

। । ज ड - सं वा दः । ।

एकदा द्वौ जडौ प्राप्तावकस्मात् च चतुष्पथे ।
एकस्तत्र सकौपीनः तथान्यश्च दिगम्बरः । ।
उचे तत्रैव सहजं सकौपीनो दिगम्बरम् ।
अरे न जडवन्मित्र चरितव्यं पथि त्वया । ।
इदं पतीयं कौपीनं गृहाण परिधेहि च ।
इति दत्त्वा स्वकौपीनं स्वयमास दिगम्बरः । ।

पुण्यपत्तनम्

पं. शेंड्ये लक्ष्मणशास्त्री

शारदा-गौरव-ग्रन्थमाला, 'शारदा', पुणे १६

१. डॉ. राजेन्द्रप्रसादचरितम्	वा. आ. लाटकर	३.००
२. वात्सल्यरसायनम्	डॉ. श्री. भा. वर्णेकर	१.००
४. श्रीरामकृष्णपरमहंसीयम्	डॉ. श्री. भा. वर्णेकर	१.२५
५. बालकानां जवाहरः	पं. विघ्नहरि भा. देव	१.००
६. श्रीमान् विन्स्टनः चर्चिलः	पं.वा.ना.औदुम्बरकरशास्त्री	१.००
७. अप्पाशास्त्री : साहित्यसमीक्षा	प्रा. अशोक अकलूजकर	२.००
८ श्रीशिवराज्योदयम्	डॉ. श्री. भा. वर्णेकर	४०.००
(साहित्य अकादमी पारितोषिकम् १९७५)		
९. 'समानमस्तु वो मनः'	डॉ. ग. बा. पळसुले	३.००
१०. मराठी-संस्कृत-शब्दकोषः	जोशी-परांजपे-गाडगीळ	२५.००
११. भूपो भिषक्त्वं गतः	पं. ग. पां. लोण्ढेशास्त्री	१.००
१२. विनायक-वीर-गाथा	डॉ. ग. बा. पळसुले	३.००
१३. आङ्ग्ल-लघु-काव्यानुवादमाला	पं. ल. ज. खरे	२.००
१४. श्रीराजयोगभाष्यम्	डॉ. चि. त्र्यं. केळघे	५.००
१५. मुक्तक-मञ्जूषा	पं. दि. दा. बहुलीकर	२.००
१६. ललित-गीता-लहरी	पं. ओगेटि परीक्षित्शर्मा	१.००
१९. संस्कृत-प्रगति-पथे कः तिष्ठति ?	पं. ल. म. चक्रदेव	२.००
२०. शाङ्कर-दिग्विजयः	श्रीविद्यारण्यः	८.००
२१. शिष्यलेखः (चन्द्रगोमिपादः)	डॉ. प. ल. वैद्य	५.००
२२. महात्म-चरितम्	पं. पं. ना. पाठक	२.००
२३. स्तोत्र-पञ्चदशी	पं. म. स. आपटीकर	१.००
२४. धन्येयं गायनी कला	डॉ. ग. बा. पळसुले	१.००
२५. विवेकानन्द-चरितम्	डॉ. ग. बा. पळसुले	१०.००
२६. शारदा-प्रसादः	पं. दत्तात्रेयशास्त्री दाणी	२.००
२७. अरविन्दचरितम्	पं. यज्ञेश्वरशास्त्री	३.००
२८. धन्योऽहं धन्योऽहम्	डॉ. ग. बा. पळसुले	५.००
२९. खेटग्रामस्य चक्रोद्भवः	डॉ. ग. बा. पळसुले	१.००
३०. अप्पाशास्त्रि-चरितम्	पं. वा. ना. औदुम्बरकर	४०.००
३१. शिवराजाभिषेकम्	डॉ. श्री. भा.वर्णेकर	१०.००
(महाराष्ट्र-शासनस्य पुरस्कारेण प्रकाशितम्)		
३३,३५. श्रीगणपतिवाक्यार्थमहासभा	पं. वसन्त अ. गाडगीळ	५.००
३६. श्रीविष्णु-सहस्र-नाम-स्तोत्रम्	पं. भीमाशंकर त्र्यं. केण्ढे	२५.००
३७. यशोधरा-महाकाव्यम्	पं. ओगेटि परीक्षित्शर्मा	१५.००
३८. श्रीविष्णुसहस्रनामावलिः ।	पं. वसन्त अ. गाडगीळ	२.००
३९. मनोबोधः ।	श्रीरासानुदासमदसः	१.२५
४०. उपनिषन्मधु	मनोहर दिवाण	५.००
४१. संशयरत्नमाला	प्रा. नलिनी पराडकर	१.५०
४२. स्तोत्राष्टकम्	विद्वान् बालगणपतिभटः	१.५०
४३. गणच्छागः	प्रा. कमलारत्नम्	१.००
४४. स्तोत्ररत्नमाला	प्रा. ह. त्र्यं. देसाई	१.५०
४५. श्रीशरन्नवरात्रचम्पूः	पं. को. कृष्ण जोयसर्	५.००
४६. भारतीय-रजनीति-प्रकाशः	पं. राजेश्वरशास्त्री द्रवीड	१५.००
४७. हरिपाठः ।	पं. म. स. आपटीकर	२.५०
४८. ते वयं पारसीकाः	डॉ. त्रि. ना. धर्माधिकारी	२.५०
४९. संस्कृत-नियतकालिक-सूची	पं. वसन्त अनन्त गाडगीळ	१.००
५०. श्रीगणपति-वाक्यार्थ-महासभा	पं. वसन्त अनन्त गाडगीळ	५.००
५१. श्रीतुलसी-मानस-नलिनम्	नलिनी साधले (पराडकर)	४०.००
५२. श्र म गी ता	डॉ. श्री. भा. वर्णेकर	२.००
५५. श्रीगणपति-वाक्यार्थ-महासभा	पं. वसन्त अनन्त गाडगीळ	५.००
५६. श्रीललिता-त्रिशती-स्तोत्रम्	पं. वसन्त अनन्त गाडग्रीळ	१.५०
५७. श्रीललिता-सहस्रनाम-स्तोत्रम्	पं. वसन्त अनन्त गाडगीळ	३.००
५८. भासोऽहासः	डॉ. ग. बा. पळसुले	१०.००
६१. सद्गात्मा-गुरुजिः	प्रा. ह. त्र्यं. देसाई	२०.००

'शारदा'-कार्यालयः, झेलम, पत्रकारनगरी, पुण्यपत्तनम् ४११०१६

संपादकः मुद्रकः प्रकाशकः स्वामी पं. वसन्त अनन्त गाडगीळ, बी.ए.बी.एड., साहित्य विशारद (पुणे दूरवाणी ५२१२४)
मुद्रण स्थलम् शारदा मुद्रण सिद्धि मन्दिरम्, पुणे १६ मे. कोकण प्रिंटर्स, चिपळूण ४१५६०५ (दूरवाणी १०१)
प्रकाशन स्थलम् श्रीशिव समर्थ मन्दिरम्, डेरवण (चिपळूण रत्नागिरी) शारदा, २ झेलम, पत्रकारनगरी, पुणे ४११ ०१६